| | | |
|---|---|---|
| (1) Consideration, reflexion. | चिन्तायामपि[1] चर्चा जगती[1] [a]राजप्रधानलोकेऽपि । | (1) The king and his subjects. |
| (1) The menses. | ऋतुरङ्गनारजस्यपि[1] विकटं श्रेष्ठेऽपि[1] निर्दिष्टम् ॥७९४॥ | (1) Excellent. |
| (1) Mail, armour. | कवचेऽपि[1] वारबाणं जीमूतं पर्वतेऽपि[1] कथयन्ति । | (1) a muntains. |
| (1) The array or arrangement of troops in particular position. | व्यूहं रचनायामपि[1] दार्वाघाटेऽपि शतपत्त्रम् ॥७९५॥ | (1) The wood-peckers. |
| (1) The body. | करणं कायेऽपि[1] स्यादुष्णीषो मूर्धवेष्टनेऽप्युक्तः । | (1) A turban. |
| (1) Goods, property. | मात्रा परिच्छदेऽपि[1] क्षुद्रः क्रूरे[1] श्रुतौ[1] निगमः ॥७९६॥ | (1) Cruel.<br>(1) The vedas. |
| (1) Curled hair. | वृजिनः केशेऽप्युक्तः[1] स्थाणुः कीलेऽपि[1] कुञ्जरे[1] नागः । | (1) A stake.<br>(1) An elephant. |
| (1) A store room. | गञ्जो भाण्डागारे[1] गोमुखमुपलेपनेऽपि[1] स्यात् ॥७९७॥ | (1) Ointment. |
| (1) Splendour, light. | तेजस्यपि[1] धाम स्यादाधारेऽप्याशयो[1] घटा गोष्ठ्याम्[1] । | (1) A receptacle.<br>(1) An assembly. |
| (1) A noble, woman. | कुल्या कुलस्त्रियामपि[1] तारो[b] मुक्तागुणेऽप्युक्तः[1] ॥७९८॥ | (1) A large pearl. |
| (1) The result of actions. | कर्मविपाकेऽपि[1] दशागती स्मृते काननेऽपि[1] दवदावौ । | (1) A forest. |
| (1) The head. | चूडाशिखे शिरस्यपि[1] हस्तिन्यां[1] धेनुकागणिके[c] ॥७९९॥ | (1) The female elephant. |
| (1) Intellect; intelligence. | प्रतिपत्[1]प्रतिपत्तावपि[2] शादः शष्पे[1] घृणा जुगुप्सायाम्[2] । | (1) Young grass<br>(2) Disgust. |
| (1) High, tall. | उत्तालमुन्नतेऽपि[1] श्रेष्ठेऽपि[1] निगद्यते सुरभिः ॥८००॥ | (1) Excellent. |
| (1) A year. | संवर्तः परिवर्तश्च हायने[1] कथ्यतेऽम्बरे[1] नाकः । | (1) Sky, heaven. |
| (1) A measure of quantity. | परिमाणेऽपि[1] प्रस्थः[d] सर्वात्मनि[1] सर्वसन्नाहः ॥८०१॥ | (1) The universal spirit. |
| (1) a wife. | पत्न्यामपि[1] द्वितीया दर्भेऽपि पवित्रमवधिरवटेऽपि[1] । | (1) Kusha grass.<br>(1) A pit, a hole. |
| (1) Natured. | प्रकृतावपि प्रधानं विवक्षितं शोभनेऽपि[1] स्यात् ॥८०२॥ | (1) Handsome. |
| (1) Excessive. | अतिमात्रेऽप्यतिवेलं कायेऽप्युत्सेध[1] इष्यते सद्भिः । | (1) The body. |
| (1) The spine. | पृष्ठास्थन्यपि[e][1] वंशः कदली करिवैजयन्त्यां[1] च ॥८०३॥ | (1) A flag carried by an elephant. |

a रा प्रधानं, राप्रधानं b तारा, धातारो c धेनुका गणिका d प्रस्थं e पृष्टास्थिन्यपि।